॥ अथ षष्ठितमोऽध्याय: ॥ chapter-60

वसिष्ठ उवाच :- ततो गच्छेन्नृपश्रेष्ठ दुर्गां दुर्गार्तिनाशिनीं ।।
ख्यातमीश्वरो यत्र पूर्वमीशेन निर्मितम् ॥ १

ईश: पुरा महाराज गंगयाऽभ्यर्थितो भृशम् ॥
संगमेन तदेशान: तन् मे पापंव्यपोहतु ॥ २

यदभूद्दूरत: प्राप्य विसृष्टं मयि मानवै: ॥
तत्तत् स्यात् दूर्योतं ज्ञात्वा गंगाया वृषवाहन: ॥ ३

गणै: सह समायात: श्रीमान्लं चोत्तमम् ॥
तीर्थयात्रोपदेशेन गौरीमामन्त्र्य शंकर: ॥ ४

ऐशान्यां दिशि निर्माय सर: प्रोत्फुल्लपंकजम् ॥
स्वयंभूर्भगवां स्तत्र संभूतो जलरूपधृक् ॥ ५

हंसकारण्डकाकीर्णो चक्रवाकोपशोभितम् ॥
समीरतरलोल्लोलतटाघात जलस्वनम् ॥ ६

प्राणायाममिषात्त्वोत्रसंगमो गंगयाऽ शिव: ॥
तस्थु: सर्वे मनोभीष्टं परिवृत्य गणा: सर: ॥ ७

-०-

१ बी ख्याता
२ बी संगमेन तवेशानस्तन्मे पापं प्रणश्यतु
३ घ ई यात्रापदेशेन
३ ए यदम्
४ ए वृषभाह्वन:
४ बी सीमरतरकल्लोल तटाघात कल-रचनम् ।
श्लो० ५ एम०बी० में नास्ति
१ ए जगद्धया ५ ए गणाणा: सर:

ईश चिरायमाणेथ दुर्गा तत्र समाययौ ॥

गंगया सहित: शंभुर्यस्मिन्सरसि तिष्ठति ॥ ८

एतस्मिन्नन्तरे राजन् प्राप्तवांस्तत्र नारद: ॥
आश्रमं शूलिनो ज्ञात्वा पार्वतीमिदमब्रवीत् ॥ ९

नारद उवाच :- क्व देवि शंकरो देवस्त्वयाहीनोऽद्य विद्यते ॥
भवत्या च क्व गन्तव्य मौत्सुक्या त्सर्वमादिश: ॥ १०

पार्वत्युवाच :- श्रीमालं चैत्र मुद्दिश्य गणै: सह गतो हर: ॥
मयाऽपि तत्र गन्तव्य मौत्सुक्यं तेन नारद ॥ ११

नारद उवाच :- श्रीमाले शिवदिक्कोणे सर: कृत्वा महेश्वर: ॥
रमते गंगया सार्द्धं तत्र गच्छ द्रुतं शिवे ॥ १२

वसिष्ठ उवाच :- तत: क्रुद्धाभवद्दुर्गा शंकरं प्रति भूमिप ॥
वेगाद्वीरैर्: प्राप्ता यत क्रीडा पुरद्विष: ॥ १३

तामायांतीं परिज्ञाय क्रुद्धां पर्वतनन्दिनीम् ।।
कर्मेदं नारदस्यैति मत्वा गंगां हरोऽब्रवीत् ।। १४

देवदेवउवाच :- गच्छ गंगे द्रुतं देव्या अभ्युत्थानं कुरुष्व वै ।।
नो चेत् क्रुद्धा महादेवी त्वां च मां चापि शप्स्यति ।। १५

वसिष्ठ उवाच :- ततो विनिर्गता गंगाबद्धाञ्जलिपुटा जलात् ।।
क्रुद्धां वीक्ष्यागतां गौरीं प्रणम्येदमवोचत ।। १६

गंगोवाच :- प्रसीद विश्व जननिगिरिजे शंकरप्रिये ।।
कथमासीन् महाकालस्तव देवि शिवं विना ।। १७

अत्रैकाकिनमाज्ञाय सरोगर्भगतं शिवम् ।।
चिरं पर्यचरंन्देवि यावदागमनं तव ।। १८

वसिष्ठ उवाच :- इत्युक्त्वा पतिता भूय: पादयो:सरितां वरा ।।
तत: प्रसादसुमुखी गौरी गंगामभाषत ।। १९

देव्युवाच :- गंगे तुभ्यं प्रसन्नास्मि प्रणिपातेन भक्तित: ।।
सपत्नीनामपि प्रीतिं-शीलं पुष्णाति सर्वत: ।। २०

-०-

स्मरणाद्दर्शनात्स्नानात्कीर्तनाश्च तवानिशम् ।।
पुंसां पापानि नश्यन्ति न मिथ्या शम्भुरब्रवीत् ।। २१

वरं वरय कल्याणि यस्तवास्ते मनोगत: ।।
दास्यामि परितुष्टाहं नात्र कार्या विचारणा।। २२

गंगोवाच :- प्रसन्ना यदि मे देवी यदि देयो वरो मम
क्रोधं मुंच महादेवि रुद्रमुद्दिश्य यं कृतम् ।। २३

आकारय जलादस्माद्देवं त्वत्क्रोधशंकितम् ।।
चतुर्दशीषु सर्वासु स्थितिमत्र करोतु वै ।। २४

देव्युवाच – बहिर्भव जगन्नाथ जलान्निहरीश मा चिरम् ।
न व्रीडा न भयं चापि देव दिग्वास[१]सो भवेत् ।। २५

-०-

१ बी दिग्वाससांभवेत्

वसिष्ठ उवाच :- इत्युक्त: स तदा राजन् देवदेवो महेश्वर: ।।
उत्तार जलात्तस्मात्स्मितभिन्नौष्ठसंपुट: ।। २६

देवदेव उवाच :- भृशमभ्यर्थितो देवि गंगयाहं मयाचव ।
क्षणं क्रीडितवानत्र प्रसीद जगतां हिते ।। २७

देव्युवाच :- चतुर्दशीषु सर्वासु गंगया सह शंकर ।।
स्थितिरत्र त्वया कार्या हिताय जगतां प्रभो ।। २८

ईशेन निर्मितं पूर्वमेतत् क्रीडासरो महत् ।।
तस्मादीश्वरोनाम्ना लोके ख्यातिं गमिष्यति ।। २६

अहमप्यत्र वत्स्यामि प्रीत्या गंगामहेश्वयो: ।।
गंगाद्वारे हरिद्वारे स्नानाद्भवति यत्फलम् ।। ३०

तत्फलं भवति पुंस: स्नानादीशसरोजले: ।। ३१

पिण्डा येत्र चतुर्दश्यां तिलपिष्टेन मानवा: ।।
भविष्यति कुले तेषां जातु नागतिक: पुमान् ।। ३२

-०-

१ घ ई स्नात्वा

२ बी तत्फलंलभते मर्त्य:

३ घ ई भविष्यति कुल तेषां जातु (बा) गतिक: पुमान्

वसिष्ठ उवाच :- इत्युक्त्वाशेन ते तत्र स्थितिं कृत्वा क्षणं नृप ।।
यथास्थानं ययुः सर्वे प्रीणामाना: परस्परम् ।। ३३

ततः प्रभृति वै राजन्नासीदीश्वरो महत् ।।
दर्शनादेवमर्त्यानां नि:शेषकलुषापहम् ।। ३४

दुर्गाभिधाना सा गौरी तत्राथापि प्रदृश्यते ।।
ददातीश-सरस्तीरे भक्तेभ्यो मनसेप्सितान्[1] ।। ३५

इति श्री स्कन्दपुराणे एकाशितिसाहस्र्यां संहितायां तृतीया-
परिच्छेदे ब्राह्मविभागे श्रीमाल माहात्म्ये श्रीईश्वरीमाहात्म्य —
— न्नाम षाष्ठितमोऽध्यायः ।।

-०-

१ बी वाञ्छित फलम्